International Journal of Scientific Research in Science, Engineering and Technology
© 2017 IJSRSET | Volume 3 | Issue 8 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099

# व्याकरणोदाहरणकाव्यसरण्यां भट्टिभौमककाव्ययोर्महत्त्वम्



**देवेन्द्रकुमारदुबे**
**शोधच्छात्रः,**
**राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः),**
**गङ्गानाथझापरिसरः,**
**इलाहाबाद, उत्तरप्रदेशः।**

संस्कृतवाङ्मये समुल्लसितशास्त्रीयग्रन्थेषु लक्ष्यप्रधानकाव्यानि काव्यशास्त्रेति पदवाच्यानि। आचार्यक्षेमेन्द्रस्य सुवृत्ततिलके प्रतिपादितं यत्-

**शास्त्रं काव्यं शास्त्रकाव्यं काव्यशास्त्रं च भेदतः ।**
**चतुष्प्रकारः प्रसरः सतां सारस्वतो मतः ॥**
**शास्त्रं काव्यविदः प्राहुः सर्वकाव्याङ्गलक्षणम् ।**
**काव्यम विशिष्टशब्दार्थसाहित्यसदलंकृतिः ॥**
**शास्त्रकाव्यं चतुर्वर्गप्रायं सर्वोपदेशकृत ।**
**भट्टिभौमककाव्यादि काव्यशास्त्रं प्रचक्षते ॥**

शास्त्रं काव्यं शास्त्रकाव्यं काव्यशास्त्रञ्चेति चतुर्धा प्रसृतं सारस्वतं शब्दार्थमयं जगत् । काव्यस्य सर्वधा साङ्गोपाङ्गलक्षणबोधकग्रन्थं शास्त्रमित्यभिहितं काव्यतत्वविद्भिराचार्यैः।ध्वन्यालोक काव्यप्रकाशसाहित्यदर्पणरसगङ्गाधरादयः यथा।विशिष्टशब्दार्थसौहृदालङ्कारसम्पृक्तो ग्रन्थः काव्यपदेन विधीयते। यथा रघुवंशकुमारसम्भवकिरातार्जुनीयप्रभृतयः। धर्मार्थकाममोक्षेति चतुर्वर्गोपदेशकग्रन्थः शास्त्रकाव्यास्पदेनाख्यायते ।यथा रामायणमहाभारतादयः ।तथा च काव्येन
सममेव व्याकरणादिशिक्षणपरकविशिष्टविषयवस्तु प्रतिपाद्यते यत्र तस्य काव्यस्याभिधानं काव्यशास्त्रमिति। यथा भट्टिभौमकधातुकाव्यादयः ।
सरस -रीत्या व्याकरण -प्रक्रियां शिक्षयितुं व्याकृतानां पदानां प्रयोगाभ्यासं च कारयितुं प्राचीनकालत एव व्याकरणोदाहरणकाव्यरचनासरणिः प्रवर्तमाना वर्तते।महाभाष्ये प्रयोगप्रदर्शन -प्रसंङ्गे उद्धृतेः कतिपयैः पद्यैरेतस्याः परम्परायाः सङ्केतो लभ्यते।

**स्तोष्याम्यहं पादिकमौदवाहिं ततः श्वभूते शातनीं पातनीं च ।**
नेतारावागच्छतां धारणिं रावणिं च ततः पश्चात् स्रंस्यते ध्वंस्यते च ॥(महाभाष्यम् 1.1.56)
बहूनामप्यचित्तानामेको भवति चित्तवान् ।पश्य वानरसैन्येऽस्मिन् यदर्कमुपतिष्ठते ॥

मैव मंस्था: सचित्तोऽयमेषोऽपि हि यथा वयम् ।एतदप्यस्य कापेयं यदर्कमुपतिष्ठति॥

(महाभाष्यम् 1.3.25)

उदाहरणकाव्यपरम्परायामस्यां वैयाकरणशिरोमणि महाकविभट्टिप्रणीतं रावणवधं नामान्तरं भट्टिकाव्यम् , महाकविना भूमभट्टेन प्रणीतम् अर्जुनरावणीयमहाकाव्यम् ,महाकविहलायुधेन प्रणीतं विशिष्टधातुप्रयोगप्रधानं कविरहस्याभिधेयं काव्यम् , आचार्यहेमचन्द्रसूरिणा निर्मितं स्वीय –व्याकरणोदाहरणं परायणं द्व्याश्रयं महाकाव्यम् , नारायणकविना विरचितं सुभद्राहरणं महाकाव्यम् , वासुदेवकविना प्रणीतं धातुकाव्यम् ,इत्यादीनि व्याकरणोदाहरणपरककाव्यानि सुप्रसिद्धानि वर्तन्ते ।

प्राचीनकाले खल्वियं परम्परा प्रचुरमात्रैरेतादृशै: काव्यमणिभि: सुतरां सम्पन्नाभूत्।सम्प्रति तेषुपरिनिर्दिष्टानि कानिचिदेवावशिष्टानि । टीकाकारशिरोमणिर्महामहोपाध्यायेन मल्लिनाथेन एतादृशं व्यकरणोदाहरणसमापनीयं काव्यम् उदाहरणकाव्यम् इत्यभिहितं भट्टिकाव्यव्याख्यादौ ।

संस्कृतसाहित्ये व्याकरणशास्त्रस्यावबोधनार्थं सायासेन नैके काव्यानि विरचयाञ्चक्रु: कवय:। काव्येष्वेषु महाकविभट्टिना विरचितं द्वाविंशतिसर्गेषूपनिबद्धं प्रकीर्ण–अधिकार–प्रसन्न–तिङन्तकाण्डेषु विभक्तं रावणवधमहाकाव्यं मूर्धाभिषिक्तं वर्तते । प्राचीनकाले पाणिनीयाष्टकेन साकं प्रसादगुणाप्लावितं छन्दोऽलंकारध्वनिकोशागारं श्रीरामकथासुधारससिक्तं भट्टिकाव्यमिदं पठित्वा नैकेवटव: महावैयाकरणत्वं महाकवित्वञ्च अभाजि। बहुपयोगि मङ्गलप्रदं व्याकरणशिक्षया सममेव धर्मसाहित्यराजनीतिशिक्षककल्पं जयतितमाम्। भट्टिकाव्यस्य मुख्योद्देश्यं ससुखेन व्याकरणशिक्षणमस्ति यतोहि व्याकरणबोधं विना दुरूह: साहित्यबोध:।बालधियां कृते व्याकरणसदृशजटिलविषयस्य लीलया रूचितया चाधिगमाय मार्गोयं सुगम:।महाकाव्यस्यान्ते कवेर्स्वीयं वचनमिदं यत्–

**दीपतुल्य: प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्।**

**हस्ताऽमर्ष इवाऽन्धानां भवेद् व्याकरणादृते।।**

आचतुर्दशसर्गात् द्वाविंशं यावत् विहिते तिङन्तकाण्डे नवलकाराणां नवप्रायोगवैचित्र्यं प्रादर्शि।सर्गैकस्मिनेव लकारैकाधितन्तु सुगुम्फिताख्यातपुष्पमाला प्रसभमाकर्षयति वैयाकरणभृङ्गवृन्दान्।यथा–

**तस्तनुर्जह्वलुर्मम्लुर्जग्लुर्लुलुठिरे क्षता: ।**

**मुमूर्च्छुर्ववमू रक्तं ततृषुश् चोभये भटा:।।**

सुबन्तेन ऋत अप्याख्यातप्रयोग: दरीदृश्यते भट्टिकाव्ये–

**भ्रेमुर्ववल्गुर्ननृतुर्जजक्षुर्जगु: समुत्पुप्लुछिरे निषेदु: ।**

**आस्फोटयाञ्चक्रुरभिप्रणेदु रेजुर्ननन्दुर्वियियुसमीयु: ।।**

महाकाव्येस्मिन्प्रयुक्तेष्वशीत्यधिकचतुश्शतधातुषु अशीत्यधिकशतद्वयं परस्मैपदी, विंशत्यधिकशतमात्मनेपदी अशीत्युभयपदीधातवश्च प्रयुक्ता:,एतस्मिन्प्रयोगेषु त्रयोदशान्यत्राप्राप्यधातव: द्वाविंशतिधातवश्चानेकगणेषु प्रदर्शिता: ।

महाकविभूमभट्ट रावणर्जुनीयमिति नामान्तरम् अर्जुनरावणीयं नामादभुतं पाणिनीयसूत्राणां लक्ष्यभूतप्रयोगप्रदर्शनात्मकम् महाकाव्यं विरचयाञ्चकार। सप्तविंशतिसर्गेष्वुपनिबद्धस्य महाकाव्यस्यास्य कथावस्तु स्वरवैदिकप्रकरणं विहाय अष्टाध्यायीसूत्रक्रममाश्रित्य संरचितम्।काव्यस्यास्य महत्तामभिसन्धायैव सवृत्तितिलककारेण आचार्यक्षेमेन्द्रेण काव्स्यास्य

कृते भौमककाव्यम् इत्यभिज्ञानं प्रदत्तम्। प्रतिसर्गे प्रतिश्लोकमस्य सूत्रोदाहरणरूपेण गुम्फितम्।यथा– प्रथमस्य सर्गस्य द्वितीय: श्लोक: इति सूत्रस्योदाहरणमस्ति।यथा– अध्यगीष्ट।

**गाङ्कुटादिभ्योञ्णिन् ङित्**

यस्या**ध्यगीष्टा**ध्ययनेन तुल्यं लोकोऽयमुच्चैस्चरितं पुनानम् ।
युद्धेषु पीनायतबाहुदर्शं शत्रुव्रजस्सङ्कुटितुं प्रनष्टः ॥

**विज इट्** – **उद्विजितुः** । **विभाषोर्णोः - प्रोर्णवितुः , प्रोर्णवितव्यम्**

बोद्धुः स्मृतेरुद्विजितुः कुदृष्टेर्द्विषस्सदा यस्य निराकरिष्णोः ।
सितैर्गुणैः प्रोर्णवितुस्त्रिलोक्या नैवापरं प्रोर्णवितव्य**मासीत्** ॥

**सार्वधातुकमपित् - कुरुतः । कुर्वन्ति ।**

प्रजानुरागं कुरुतः स्म यस्य त्यागः क्षमा च क्षतकल्मषस्य ।
भुजाश्च कुर्वन्ति पुरा सहस्रं पारेसमुद्रं वसतिं रिपुणाम् ॥

**असंयोगाल्लिट् कित् - चिच्छिदतुः । विचिच्छिदुः ।**

कुतूहलं चिच्छिदतुर्जनानां नालोकितञ्चालपितञ्च यस्य ।
महाह्रदस्येव पयांसि तृष्णां विचिच्छिदुश्चित्रमहो धनानि ॥

**इन्धिभवतिभ्या च बभूव मृडमृदगुधकुषक्लिशवदवसः क्त्वा –मृड-........। मृद-मृदित्वा ।गुध-.........।क्लिश-अक्लिशित्वा। वद-उदित्वा।वस-उषित्वा।**

सलीलमाजावहितान्मृदित्वा सत्यामुदित्वा गिरमक्लिशित्वा ।
सतामुषित्वा हृदयेषु नित्यं बभूव यो गुण्यतमो नृपणाम् ॥

**रुदविदमुषग्रहिस्वपिप्रच्छः संश्च- रुदित्वा, रुरुदिषुः । विद- विदित्वा, विविदिषाम् । मुष-मुषित्वा, मुमुषिषाम् ।स्वपि –(सुप्त्वा18 .10),सुषुप्सुः। ग्रहि- गृहीत्वा,जिघृक्षुम् । प्रच्छ-पृष्टवा,पिपृच्छिषून्।**

यत्र पाति न पुरास्ति रुदित्वा संस्थिता रुरुदिषुर्जनता वा ।
यद्गुणांश्च बहुशोऽपि विदित्वा कौतुकाद्विविदिषां न जहाति ॥
सङ्कटे जनतया स्मृतमात्रो य:प्रसह्य किल चोरजनस्य ।
जीवितं मुमुषिषाञ्च मुषित्वा दृश्यतामुपययावुरुचापः ॥
जिघृक्षुमेवाशु रिपुं गृहीत्वा पिपृच्छिषून्मन्त्रिजनानपृष्ट्वा ।
सुषुप्सुरप्यात्महितेषु जाग्रघो भीतिभाजं कृपया मुमोच ॥

**इको झल्-चिचीषतः । तुष्टूषः । हलान्ताच्च- बिभित्सतः ।बुभुत्सुः ।**

चिचीषतो यज्ञशतेषु वेदीस्तुष्टूषुरिन्द्रोऽपि बभूव यस्य ।
बिभित्सतः शत्रुबलानि शक्तिं बुभुत्सुरासीत्समरे न कश्चित् ॥

**लिङ्सिचावात्मनेपदेषु- भित्सीष्ट।अभित्त । उश्च –कृषीष्ट ।अकृत ।**

भित्सीष्ट युद्धेषु भवानरातीनितीव योऽभित्त गुरुदिताशीः ।

शक्रोऽपि ते वीर हितं कृषीष्ट यस्याकृतेतीव स विप्रवाक्यात् ॥

**वा गमः –लिङ् –सङ्गसीष्ट ,सङ्गसीष्ठाः ।सिच् –समगत, समगस्त।**

लक्ष्म्या हरिवद् भवानजस्रं सङ्गंसीष्ट यथेत्युदीरिताशीः ।
पित्रेति समभ्यधयि यस्य तद्वत्त्वं विजयेन सङ्गसीष्ठाः ॥
त्रासनम्रशिरसाशु शत्रुणा यत् पुमान् समदतार्द्रमानसः ।
त्यक्तशत्रुजनया जयश्रिया संयुगेषु समगंस्त चास्तभीः ॥

**हनः सिच् – आहत । यमो गन्धने – उदायत ।**

**विभाषोपयमने –उपायत, उपायंस्त । स्थाघ्वोरिच्च –उपास्थित ।अदित ।**

स्वमाहतोरस्समुपात्तमोहः कृत्वा विरोधं सह येन शत्रुः ।
उपायत स्वां विहितोपदेशां प्रज्ञां सदोदायत निर्मलां यः ॥
पृथ्वीमुपायंस्त ससागरां यस्सर्वं मुदोपास्थित राजकं यत् ।
तस्मै धनं योऽदित भक्तिभाजे महात्मनां श्रीर्नतिमात्रभोग्या ॥

निश्चप्रचमेव भट्टिकाव्यरावणार्जुनीये व्याकरणोदाहरणकाव्यपरम्परायां धुरिकीर्तनीये चूडामणावलङ्कृते वर्तेते।

**सन्दर्भग्रन्थसूची**


1. अष्टाध्यायी –महर्षिपाणिनिप्रणीता , सम्पादकः प्रो. गोपालदत्तपाण्डेयः,प्रकाशकः चौखम्भासुरभारतीप्रकाशनं वाराणसी,प्रकाशनवर्षं–2019
2. अर्जुनरावणीयं( रावणार्जुनीयम् ) कैरलीयटीकोपेतसंस्करणम्, काश्मीरकमहाकविभूमभट्टविरचितम्, सम्पादकः विजयपालशास्त्रीशिवचन्दसूनुः, प्रकाशकः –राष्ट्रियसंस्कृतसंस्थनम्, मानितविश्वविद्यालयः नवदेहली,प्रकाशनवर्षं–2008
3. भट्टिमहाकाव्यम् – महाकविभट्टिविरचितं,सम्पादकः श्री गोपालदत्तपाण्डेयः,प्रकाशकः चौखम्भासुरभारतीप्रकाशनं वाराणसी,प्रकाशनवर्षं–2018
4. भट्टिमहाकाव्यं पाणिनीयव्याकरणस्य च तुलनात्मकमध्ययनं लेखिका डा. शशिबाला, प्रकाशकः विद्यानिधिप्रकाशनम्,प्रकाशनवर्षं– 1994
5. भट्टिमहाकाव्यमेकमध्ययनम्, आंग्लसंस्करणं, लेखिकः डा. सत्यपालनारंगः,
6. रावणार्जुनीयं महाकविभट्टभीमप्रणीतं,सम्पादकः प्रो. व्रजेशचन्द्रश्रीवास्तवः, प्रकाशकः चौखम्भाविद्याभवनवाराणसी,प्रकाशनवर्षं–2015
7. रावणार्जुनीयस्य व्याकरणिकमध्ययनम् लेखिका संगीता–अग्रवालः, प्रकाशकः न्यू भारतीयबुककार्पोरेशन–नवदेहली,प्रकाशनवर्षं–2009
8. संस्कृतव्याकरणशास्त्रेतिहासविमर्शः , लेखकः डा. अशोकचन्द्रगौडशास्त्री,प्रकाशकः भारतीविद्यासंस्थानवाराणसी,प्रकाशनवर्षं–2019